श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीवड्डुवूर् विंशतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवडुवूर् विंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः ॥

वसुधावसुतावाहि वडुवूर् वडुवूर् इति।
वदतां विदुषामेष वचसां वशगोऽस्म्यहम् ॥ 1 ॥

बाणं धनुश्च करयोः कलयन् सुवर्ण -
प्रत्युप्तरत्ननिकरं बहुरत्नभूषः।
मन्दस्मितेन मधुरेण मनो मदीयं
सम्मोहयन् जयति कोसलराजसूनुः ॥ 2 ॥

वक्षस्स्थलं तव विशालमतीव रम्यं
रामा वरा निवसतीह कुतो नु राम !।
लक्ष्मीश्शुभा तव समाङ्गविसृत्वरी या
तस्याः किमाकृतिरसावधिदेवतायाः ॥ 3 ॥

श्रीमत्कोसलनाथ ! कोसलसुतासर्वाङ्गसम्मर्दनं
श्रीमत्कौशिकयोगिना घनवने सञ्चारितं चारु ते।
श्रीमद्गौतमदारसर्गनिपुणं श्रीमैथिलीलालितं
श्रीमन्मारुतिमस्तकेन विधृतं पादं मदन्तः कुरु ॥ 4 ॥

गृहक्षेत्रारामाः जनकचरणस्पर्शसुभगाः
त्वया मत्तो नीताः मनुकुलपते ! किं मम ततः

त्रिभङ्गीसंसेव्यं मधुरमधुरं ते वपुरिदं
मदन्तस्संसक्तं न खलु परिहर्तुं प्रभवसि॥ 5॥

लावण्यैकनिकेतनं जनकजाचक्षुर्विहारास्पदं
वाल्मीकेर्वदनारविन्दगलितैर्वाक्यामृतैर्वर्णितम्।
बाणं चापि धनुश्च भूषणगणं सम्भूषयत्ते वपुः
दिव्यं भव्यमिदं मनो हरति मे कुर्वे कथं वा स्तुतिम्॥ 6॥

ऊरू काञ्चननिर्मिते नु भगवन् रम्भे तु दूरे गिरा -
मेते भूषितकाञ्चनाङ्कमधुरप्रान्तप्रकृष्टाम्बरे।
यद्वा मन्मथलोकजैत्रभवनस्थूणे तदङ्गद्विषः
चापं ध्वंसयतस्तवेति न वयं निर्णेतुमीशाः प्रभो !॥ 7॥

मत्तो नूनमहो निशाचरपतिर्न्यूनो हि दौष्ट्ये भृशं
मामप्यत्र विमोहयत्यतितरामेतत्कठोरान्तरम्।
कस्माद्राम ! स नाम धीर ! बत ते सौन्दर्यवारान्निधे -
रस्याग्रे रणमग्र्यविग्रहवतामग्र्यः चकाराद्भुतम्॥ 8॥

यद्वानीदृगभूत्तदा तव वपुस्सत्यं यतो मैथिली
दूरे तद्विरहाग्निना ननु भवान् प्लुष्टो विकारं गतः।
तस्मादेव मुमोह नैव वपुषा सौन्दर्यसारेण ते
युद्धं नाम चकार हन्त कृश इत्यास्थाय बुद्धिं जडः॥ 9॥

मनागिवोत्फुल्लकपोलयुग्मं
मन्दस्मितं मञ्जुलतुङ्गघोणम्।
माधुर्यसारास्पदमाननं ते
मदन्तरङ्गे विहृतिं विधत्ते॥ 10॥

prapatti.com sundarkidambi
sunder kidambi

बाणोऽर्धचन्द्रस्तव फालदेशः
प्राणापहारं तनुते परेषाम्।
आमर्धचन्द्रस्य निसर्ग एषः
प्राणापहृत्त्वं हरमौलिधाम्नः ॥ 11 ॥

विशालफालं विपुलाक्षियुग्मं
किञ्चित्प्रफुल्लान्तकपोलपालि।
मन्दस्मितालङ्कृतमुन्नसं ते
मुग्धाननं नृत्यति मानसे मे ॥ 12 ॥

रघुमणिरपि स त्वं हन्त चित्रं स्वकान्त्या
गुरुमणिकुलमेतत्संविधत्से प्रशस्तम्।
निजवपुषि निलीनं किं गुरुत्वे लघुत्वे
भवति हि शुभतेजः कुत्रचिद्दैवयोगात् ॥ 13 ॥

सीता लता काऽपि भवत्समीपे
भवान् महानाश्रितकल्पवृक्षः।
वयं पुनः किङ्करतां विहाय
पाटच्चरा नाम फलं भजामः ॥ 14 ॥

इष्टं ते न करोम्यनिष्टमखिलं सम्यक् करोमि प्रभो !
त्वत्तः किं नु फलं तवेष्टजनवत् प्राप्नोम्यहं वञ्चकः।
नैवं त्वद्दययेति वेद्मि निपुणं सञ्चिन्त्य तस्मादमुं
पाहि त्वं दयया दयागुणमयं वेत्तीति विद्वानिति ॥ 15 ॥

मनुभिः किमु तैर्विचिन्तितैर्मनुमुख्यैरपि मानितैः परैः।
मनुवंशमणिस्तु चिन्तितो मनुजाः ! सर्वहितं विधास्यति ॥ 16 ॥

भवतः पदमाश्रितो जनः भगवन्नुत्तमतां समश्नुते।
भवतः पुनराननं श्रितः कथमासीदधरस्तदद्भुतम्॥ 17॥

त्वं जीवबन्धुस्तव चाननेऽस्मिन्
जातोऽधरोऽयं किल बन्धुजीवः।
यो वैपरीत्यं जुषते स्थितीनां
स चाधरस्स्यादिति युक्तमेव॥ 18॥

धनूरत्नं हस्ते कनकमयघण्टाघणघणं
तटिद्वल्लीतुल्यं किमपि कलयन् पर्वसुभगम्।
इतो रत्नैराढ्यं शरमपि दिनादौ दिनमणिं
विधुन्वन्तं धून्वन् रघुपतिरहो मोहयति माम्॥ 19॥

कौसल्यातनयाय दाशरथये साकेतबालाय ते
वैदेहीरमणाय वीरमणये श्रीरामभद्राय ते।
भ्रातृप्रीतिनिकेतनाय विपिनावासाय सत्याय ते
रक्षोनाशकराय दैवतगणस्तुत्याय तुभ्यं नमः॥ 20॥

मैथिलसम्भवधामविलोले
मारुतिलक्ष्मणमण्डितपार्श्वे।
मानुषलक्षणमाधवदेवे
मानस ! सञ्चर मामक ! रामे॥ 21॥

धनुष्पुरश्रीनिधिराघवेण
धनुष्करश्रीनिधिराघवस्य।
इयं कृता विंशतिरादरेण
जयं प्रदातुं पठतां समर्था॥ 22॥

॥ इति श्रीवडुवूर् विंशतिः समाप्ता॥